अप्रैल तः मई २०२६ पर्यन्तम्
चैत्र-शुक्ल-चतुर्दशी तः ज्येष्ठ-शुक्ल (अधि.) पूर्णिमा पर्यन्तम्
(वैक्रमाब्दः-२०८३)

RNI
DELSAN/2013/50379

ISSN:2347-1565

संस्कृत-चन्द्रिका

मासिकी संस्कृत-बालपत्रिका

(वर्षम्-१३-अ±: ९-१०)

(संयुक्ता±:)

सम्पादकः
शैलेन्द्रकुमारसिंहः
सचिवः

ISSN-2347-1565

मूल्यम्- ₹25 रूप्यकाणि

संस्कृत-चन्द्रिका

'मासिकी संस्कृत-बाल-पत्रिका'

अप्रैल तः मई
२०२६ पर्यन्तम्

वर्षम्-१३ अङ्कः-९-१०
(संयुक्ताङ्कः)
(वैक्रमाब्दः-२०८३)

(चैत्र-शुक्ल-चतुर्दशी तः
ज्येष्ठ-शुक्ल (अधि.)-पूर्णिमा
पर्यन्तम्)

सम्पादकः
शैलेन्द्रकुमारसिंहः
सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः

क्र.सं.	अनुक्रमणिका	पृष्ठ-संख्या	
१.	सम्पादकीयम्	सचिवः/सम्पादकः	III
२.	बाललीलादशकम्	डॉ. विपिनकुमारः द्विवेदी	१
३.	अरे त्वं क्वासि भो सखे?	डॉ. एन्. के. सुन्दरेश्वरन्	३
४.	एकात्ममानववादस्यप्रणेता पं. दीनदयाल उपाध्याय व्यक्तित्वं कृतित्वञ्च	डॉ. जगदीशप्रसादशर्मा	५
५.	दामिन्या	प्रो. ओम्प्रकाशपाण्डेयः	८
६.	दर्पणः	डॉ. निरंजना सी. जोशी	१२
७.	ईश्वरः सर्वव्यापकः	डॉ. रामकिशोरमिश्रः	१३
८.	क्षणिकाः -५	प्रो. शुकदेवः शर्मा	१४
९.	क्षणिकाः -६	,,	१६
१०.	उद्याने	डॉ. हर्षदेवमाधवः	१८
११.	चन्द्रयानम्	,,	१९
१२.	संस्कृतेर्नवाऽध्यायः	डॉ. हर्षदेवमाधवः	२०

दिल्ली संस्कृत अकादमी
(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)
DELHI SANSKRIT ACADEMY
(Govt. of N.C.T., Delhi)
ई-पत्रिका

प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005

दूरभाषः - 011-20920361, 20920363

सदस्यताशुल्कम्

प्रति-अङ्कम् : ₹25 रूप्यकाणि

वार्षिकम् : ₹250 रूप्यकाणि

ISSN : 2347-1565

©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः अन्तर्जालमाध्यमेन (online) अथवा सी०टी०सी० चैक माध्यमेन

(दिल्लीसंस्कृतअकादमीपक्षे)

E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com

Website : www.sanskritacademy.delhi.gov.in

सम्पादकीयम्

अयि गीर्वाणवाणीसमुपासकाः सुहृदयाः!

भवन्तः भवन्त्यश्च जानन्त्येव यत् स्वालम्बनम् आत्मनिर्भरता वा एकः दिव्यः गुणः वर्तते यः महत्तमान् अपि विघ्नान् कष्टान् च नाशयति, जीवन-मार्गं सुखमयं विदधाति। एषा एतादृशी अपूर्णा शक्तिः वर्तते यस्मिन् समक्षे जगतः सर्वाः शक्तियः हीनाः भवन्ति। यत्र आत्मनिर्भरता भवति तत्रैव प्रगतिः ; यत्र पराश्रयता तत्र क्षयः अवनतिÁ साक्षात् दृश्यते। अत एव उच्यते यत् ईश्वरः अपि तेषामेव सहायकः भवति ये स्वसहायकाः भवन्ति। ये व्यक्तयः, समाजाः, राष्ट्राणि च आत्मनिर्भराः वर्तन्ते ते एव विश्वऽस्मिन् उन्नति-शिखरमारोहन्ति प्रगतेः पराकाष्ठां च प्राप्नुवन्ति। पराश्रयः कदापि उन्नतिं न जनयति। अद्य भारतराष्ट्रम् 'मेक-इन-इण्डिया' इत्यस्य स्वालम्बन-संकल्पस्य माध्यमेन वैश्विकमञ्चे सशक्त-राष्ट्ररूपेण स्वं स्थापयितुं मार्गे प्रयासरतं वर्तते। अतः प्रत्येकः भारतीयः परिश्रमे आत्मगौरवं गणयेत् तथा च राष्ट्रं उन्नतिमार्गं नयेत्। एतां भावनां मनसि कृत्वा दिल्लीसंस्कृताकादमी नियमितरूपेण बालसाहित्युपेतां संस्कृतचन्द्रिकां बालपत्रिकारूपेण प्रकाशयति।

संस्कृताध्येतॄणां विद्यार्थीनां समक्षं संस्कृतचन्द्रिका-मासिकी-बालपत्रिकायाः त्रयोदशतमवर्षस्य अप्रैलतः मई २०२६ पर्यन्तमम् प्रकाशितः संयुक्ताङ्कः (९-१०)सर्म्पयते। संयुक्तांकेऽस्मिन् डॉ. विपिनकुमारः द्विवेदी-महोदयस्य कविता 'बाललीलादशकम्,' डॉ. एन्.के.सुन्देश्वरन् महोदयस्य कविता 'अरे त्वं क्वासि भोः सखे?', डॉ. जगदीशप्रसादशर्ममहोदयानां बालोपयागी आलेखः 'एकात्ममानववादस्य प्रणेता पं.दीनदयाल-उपाध्यायस्य व्यक्तित्वं कृतित्वञ्च', प्रो. ओम्प्रकाशपाण्डेयमहोदयस्य कविता 'दामिन्या', डॉ. निरंजना सी. जोशी महोदयानां ज्ञानप्रदः एकः आलेखः 'दर्पणः', डॉ. रामकिशोरमिश्रस्य कविता 'ईश्वरः सर्वव्यापकः', प्रो. शुकदेवशर्ममहोदयनां कतिपयानां शब्दानां निस्पत्तिः व्युत्पत्तिः वा 'क्षणिका-द्वयी', डॉ. हर्षदेवमाधवस्य कविता 'उद्याने एवं चन्द्रयानम्' तथा च एका विज्ञान-कथा 'संस्कृतेर्नवाऽध्यायः' इत्यादयः रचनाः प्रकाशिताः सन्ति। सर्वाः बालरचनाः विद्यार्थिनाम् जिज्ञासुपाठकानां कृते अतीव रोचकाः संस्कृते रुचिवर्धकाः वर्तन्ते। लेखकैः अपि अनुरोधः क्रियते यत् बालकेषु सृजनशीलता-भाषाकौशलं च वर्धयितुं नूतनानि लेखनानि प्रेषयन्तु। आशासे बालपत्रिकेयं बालकैः सोत्साहं च पठिष्यत इति।

भावत्कः

शकाब्दः १९४८(वैशाख-शुक्ल-पूर्णिमा) ***(शैलेन्द्रकुमारसिंहः)***

बुद्धपूर्णिमा सचिवः

बाललीलादशकम्

-डॉ. विपिनकुमारः द्विवेदी*

वृत्तम्- उपजाति

किलस्वनैः खेलति बालवृन्दम्,
अनेकखेलैः कुरुते प्रमोदम्।
संसारमेकं सृजतीह नव्यम्,
न जायते कस्य मनो हि कृष्टम्।।१।।



बालं विना निश्चयमेव शून्यम्,
गेहं समस्तं रमते न सौख्यम्।
वृक्षं विना भाति वनं यथा न,
जगत्तथेदं न विना च बालम्।।२।।

अहो विशेषः खलु बालभावः,
वृद्धस्य चेतो भवतीह बालः।
अशान्तचित्तं सुखमेति शीघ्रम्,
दयाविहीनं सदयं विधत्ते।।३।।

स्वकीयहासेन सुधां विकीर्य,
संजीव्य संसारवितप्तलोकान्।
प्रसार्य वाचो मधुरं सुगन्धम्
सानन्दमाभाति सुबालविश्वम्।।४।।

पवित्रमास्ते हृदयं तदीयम्,
स्पृष्टं न किञ्चिज्जगतो विकारैः।
द्वेषप्रमुक्तं प्रियताप्रपूर्णम्,
विज्ञायतेऽसौ भगवत्स्वरूपः।।५।।



स्नेहेन बालाः प्रवदन्ति यत्र,
देवा रमन्ते सततं हि तत्र।
रसालवृक्षस्थितकोकिला वै,
कूजन्ति संभान्ति यथा तथेमे।।६।।

---

* पी सी पी इंटर कॉलेज, हुसैनगंज, फतेहपुरम्,

भाग्यं गृहस्थस्य यदीयबालाः,
लोके समृद्धं ननु तस्य गेहम्।
उद्यानभूमिः कुसुमैः यथा हि,
तथा हि बालैः परिवारसर्वम्।।७।।



मिष्ठान्नमेते यदि संल्लभन्ते,
भूत्वापि बालाः कुपिताः प्रसन्नाः।
हठं तदीयं खलु नापि वार्यम्,
यन्निश्चितं तन्निरताश्च लब्धुम्।।८।।

पितामहीप्रेमनिबद्धबालाः,
तया सहैव भ्रमणप्रियाश्च।
क्रीडन्ति सम्मिल्य तदीययष्ट्या,
क्रोधेन तस्या मुदमावहन्ति।।९।।

पितामहस्य क्वचिदंशभागः,
आरुह्य दूरे भ्रमणं चरन्ति।
रुदन्ति चेत्ते जननीमवीक्ष्य,
विचित्रमेतद्बहु बालविश्वम्।।१०।।



अरे त्वं क्वासि भोः सखे?

-डॉ. एन्. के. सुन्दरेश्वरन्

दर्शं दर्शं सुरम्याणि श्रावं श्रावं मनोहरम्।
पायं पायं सुपेयानि खादं खादं सुपेशलम्।।
चरन्नस्मि बहोः कालादन्विष्यन्निव किञ्चन।
कं वा मृगयते चेतः व्यक्तता नास्ति मे हृदि।।

कदा वा प्रस्थितः सोऽहं का वा सा प्राप्यभूरिति।
किमुद्दिश्य चरामीति कुतो वा प्रस्थितस्त्विति।।
नैव जाने परं मङ्क्षु चरन्नेवास्मि भृ३वत्।
चरैवेति चरैवेति कोऽपि त्वरयतीव माम्।।

अरण्यानि सुघोराणि राष्ट्राणि नगराणि च।
तथा जनपदाः स्फीता बहवोऽध्युषिता मया।।
भोगाश्च विविधा भुक्तास्तिक्ता रुचिकरास्तथा।
अथापि सञ्चरन्नस्मि बलादिव नियोजितः।।

मध्येमार्गं कदाचिच्च सखिवत्त्विह केचन।
सुखदुःखे संविभज्य मोदयन्तीव मे मनः।।
तद्वियोगे परं शोचन् कञ्चित्कालं भवाम्यहम्।
विस्मरामि च तं शोकं पुनरन्यान् यदा लभे।।

यद्रोचते न मह्यं तद् द्राग्घातुं त्वरते मनः।
प्रियं लब्ध्वा तु सन्तुष्यन् हातुं नेच्छामि जातु तत्।।
सुखं वा यदि वा दुःखमानन्दं भयमेव वा।
भुञ्जानस्य सदाऽशान्तिर्ग्रसते मे मनः कुतः।।

चरामीह बहोः कालात् मार्गमाणोऽस्मि कञ्चन।
न जाने तं जनं सम्यग् यं द्रष्टुं त्वरते मनः।।
तदा तदा स्मरामीव पश्यामीव च तं प्रियम्।
तथापि नैव शक्नोमि ग्रहीतुं तत्स्मृतिं पुनः।।

** आचार्य, सेवा निवृतः, संस्कृत विभागः, कालिक्कट्, विश्वविद्यालयः, केरलराज्यम्।*

सा दिदृक्षा त्वराऽव्यक्ता ह्युद्वेगस्तत्कृतः परम्।
नष्टिमेति झटित्येव तटित्सौदामिनी यथा।।

नाज्ञातस्वं सखे किन्तु न ज्ञेयोऽस्यधुना कथम्।
अयि प्रिय सखे भ्रातः! रूपं दर्शय तावकम्।।
यावन्नापैति ते चिन्ता व्युष्टाऽस्पष्टा हृदो मम।
तावत्त्वं दर्शयात्मानम्, अरे कुत्रासि भोः सखे।।

एकात्ममानववादस्यप्रणेता पं० दीनदयाल उपाध्यायस्य व्यक्तित्वं कृतित्वञ्च

-डॉ. जगदीशप्रसादशर्मा

पं० दीनदयाल उपाध्यायमहोदयस्य जन्म मथुरा जनपदस्य फरह निकटे नगलाचन्द्रभान नाम्नि ग्रामे विक्रम सम्वत् १९७३ तमे वर्षे तदनुसार सितम्बर मासस्य पंचदशतारिकायां १९१६ ईसवीयवर्ष आश्विनकृष्ण त्रयोदस्यां सोमवासरे अभवत्। अस्य बालस्य पितामहः पं० हरीराम महोदयः ज्योतिर्विज्ञाः आसन्। पितुः नाम भगवती-प्रसादवर्यः जलेसररोड़ स्थिते रेलवेस्टेशन-अधीक्षकपदे नियुक्तः आसीत्। अस्य मातुः नाम श्रीमतीरामप्यारीदेवी आसीत्। माता अमुं बालं 'दीना' इति नाम्ना सम्बोधयति स्म। बालकस्य जन्मपत्रिकां दृष्ट्वा ज्योतिर्विज्ञैः घोषणाकृता यत् एषः बालः मनीषीभूत्वा देशभक्तो भविष्यति। वर्षद्वयः अनन्तरम् रामप्यारी देव्याः द्वितीय पुत्रस्य जन्म अभवत्। दीनदयालस्य अनुजस्य नाम शिवदयालः संजातः। अस्य बालस्य जन्मस्य मासाभ्यन्ते पिता भगवती प्रसादस्य देहावसानः सञ्जातः। भ्रातरौ स्वकीयमातुः साकं मातामह पं० चुन्नीलालमहोदयस्य गृहे गतवन्तौ। यदा एषः महोदयः सार्धषडवर्षीयः आसीत्। माताऽपि स्वर्गं गता। मातामहः राजस्थानप्रान्तस्य धनकिया रेलवेस्थानके स्टेशन-अधीक्षक पदे आसीत्। सः अपि विषमपरिस्थितौ स्वकीय सेवातः त्यागपत्रं दत्वा स्वकीय ग्राम 'गुड़ की मण्डी' (फतेहपुरसीकरी निकटे) बालैः सह आगत्य पालनपोषणं कृतवान्। अस्य मातुलः रेलविभागे गार्डपदं स्वीकरोति स्म। अनुज शिवदयालेन साकं दीनदयाल महोदयः मातुल राधारमणेन साकं गंगापुरम् सम्प्राप्तः।

गंगापुरस्थले पं० दीनदयाल महोदयस्य प्रारम्भिक शिक्षा सम्पन्ना। यदा अस्य वयः प्रायः नववर्षदेशीयः आसीत् सितम्बरमासस्य १९२६ तमेवर्षे मातामहः चुन्नीलाल महोदयोऽपि स्वर्गं गतः। मातुलः राधारमणः बालद्वयं पोषयति स्म। अस्मिन्नेव समये दुर्भाग्यवशात् मातुलः क्षयरोगेण पीडितः सञ्जातः।[१]

प्रारम्भिक शिक्षायाः अनन्तरम् दीनदयालमहोदयः राजगढ़स्थानं प्राप्तः ततः एव नवमीपरीक्षा समुत्तीर्णा। हाईस्कूलपरीक्षां सीकरतः समुत्तीर्णा तथा अजमेरबोर्डतः १९३४ तमे वर्षे प्रथम श्रेणी लब्ध्वा बोर्डमध्ये प्रथमं स्थानं प्राप्तम्। गणितविषयः अस्य प्रियः विषयः आसीत्। कथ्यते 'होनहार विरवान् के होत चीकने पात' प्रथमश्रेणी तथा च प्रथमं स्थानं प्राप्ते सति स्वर्णपदकैः साकं छात्रवृत्ति अपि प्राप्ता। इण्टरमीडिएट परीक्षा पिलानीतः समुत्तीर्णा। सीकरनरेशैः पुरस्कृतः एषः महोदयः पारितोषिकं प्राप्तवान्।

१९३६ तमेवर्षे प्रथम श्रेण्यामेव इण्टरमीडिएट परीक्षा साफल्येन समुत्तीर्णा। १९३७ तमे वर्षे बी०ए० अध्ययनार्थं दीनदयालमहोदयः कानपुरनगरं सम्प्राप्तः सनातनधर्म महाविद्यालये प्रवेशं स्वीकृतवान्। कानपुर प्रवास समये अस्य मित्रता बलवन्तमहासिन्धे तथा च सुन्दरसिंहभण्डारी महोदयैः साकं अभवत्। अत्रैव माननीय भाऊरावदेवरसमहोदयैः सह सम्पर्कः अभवत्, तैः प्रेरणां समवाप्य एषः राष्ट्रीय स्वयंसेवक संघस्य स्वयंसेवकः संजातः। कानपुरनगरे एव राष्ट्रीय स्वयं-सेवक-संघस्य संस्थापकः डॉ० केशवरावबलिरामहेडगेवार महोदयैः

** प्राचार्यः, ग्राम स्वावलम्बी इण्टर कॉलेज, सौख, मथुरा, उत्तर प्रदेशः*
रुक्मणी विहारः, पो. कृष्णा नगरम्, मथुरा, उत्तर प्रदेशः

सह सम्पर्क-सम्बन्धः सञ्जातः। १९३९ तमेवर्षे कानपुरतः प्रथमश्रेण्यामेव बी०ए० परीक्षा समधिगता। संघकार्येऽपि संलग्नः। एम०ए० अध्ययनार्थम् आगरानगरमागत्य सेन्टजॉसमहाविद्यालये आंग्लविषयं स्वीकृत्य एम०ए० प्रथमवर्षस्य परीक्षा प्रथम श्रेणी अंकानवाप्य समुत्तीर्णा। अस्मिन्नेव समये श्रीमान् नानाजी देशमुख-महोदयः आगरां आगतः पं० दीनदयालमहोदयः नानामहोदयेन साकं संघकार्ये संलग्नः। अस्मिन्नेव समये महोदयस्य एका पारिवारिक भगिनी रमादेवी स्वकीयचिकित्सा निमित्तं महोदयस्य पार्श्वे आगतवती, अस्याः सेवाकारणवशात् एम०ए० उत्तरार्ध परीक्षा न दत्ता।[२]

पण्डित दीनदयालमहोदयः सर्वदा भारतीयपरिधानं धौतवस्त्रं, कुर्तावस्त्रं स्वीकरोति स्म। अतः जनाः तं परिहासरूपेण पण्डितजी इति नाम्ना सम्बोधयन्ति स्म। अग्रेगत्वा सः पण्डित इति नाम सम्पूर्णविश्वे सार्थकं कृतवान्।

१९४२ तमेवर्षे पं० दीनदयालमहोदयः स्वकीय सम्पूर्णजीवनं राष्ट्राय समर्पितम्। सर्वप्रथमं महोदयः लखीमपुरजनपदस्य जिलाप्रचारक पदे नियुक्तः। १९४७ तमे वर्षे उपाध्यायमहोदयः उत्तरप्रदेशस्य सहप्रान्त प्रचारकः अभवत्। लक्ष्मणपुरम् अस्य केन्द्रमासीत् १९४७ तमे वर्षे संघद्वारा राष्ट्रधर्म प्रकाशनस्य योजना लखनऊ नगरे अभवत्। पाञ्चजन्य साप्ताहिक स्वदेशी दैनिक पत्रस्य प्रकाशनं दीनदयालमहोदयस्य आध्यक्षे समारब्धः। सम्पूर्ण कार्यं प्रकाशनस्य स्वयमेव सम्पादयति स्म।

पण्डितवर्य्याः वस्तुतः सरस्वत्याः समाराधकाः आसन्। अनवरतम् महोदयस्य लेखनकार्यं प्रचलित स्म। एतेषां मौलिकग्रन्थेषु राष्ट्रजीवनकीदिशा, एकात्ममानववाद, लोकमान्यतिलक की राजनीति, जनसंघ सिद्धान्त और नीति, जीवन का ध्येय, राष्ट्रीय आत्मानुभूति, हमारा कश्मीर, अखण्ड भारत, 'शंकराचार्य, सम्राटचन्द्रगुप्त, एतेषां प्रमुखाः रचनाः सन्ति ।

१९५१ तमेवर्षे अक्टूबर मासस्य एकविंशति दिनांके भारतीय जनसंघस्य स्थापनाघोषणा अभवत् दिसम्बरमासे कर्णपुरनगरे जनसंघस्य प्रथम अधिवेशनं अभवत् तत्र डॉ. श्यामाप्रसादमुखर्जी अखिल भारतीय-अध्यक्षपदं तथा च परमपूज्य गुरुजी महोदयस्य आदेशानुसारं पं० दीनदयालजी अस्य दलस्य महामंत्री नियुक्तः। पं० दीनदयाल-उपाध्यायमहोदयस्य राजनैतिक जीवन यात्रायाः प्रारम्भः अत्रैव संजातः।

पंडित दीनदयालमहोदयस्य एकात्ममानवदर्शनं अतीव प्रथितमस्ति। तैः कचितमासीत्..... ''आज देश में ऐसे करोड़ों मानव हैं जो मानव के किसी भी अधिकार का उपयोग नहीं कर पाते।..... ये मैले-कुचैले, अनपढ़ सीधे-सादे लोग हमारे नारायण हैं। हमें इनकी पूजा करनी है जिस दिन हम इनके पक्के सुन्दर घर बनाकर देंगे, जिस दिन हम इनके बच्चों और स्त्रियों को शिक्षा और जीवन दर्शन का ज्ञान देंगे, जिस दिन हम इनके हाथ और पाँव की बिवाईयों को भरेंगे और जिस दिन इनको उद्योग धन्धों की शिक्षा देकर इनकी आय को ऊँचा उठा देंगे उस दिन हमारा भ्रातृभाव व्यक्त होगा।[३]

१९६७ तमे वर्षे पं० उपाध्याय महोदयः केरल प्रान्तस्य कालीकट अधिवेशने जनसंघस्य अखिल भारतीय अध्यक्षः चयनितः। अस्य महोदयस्य अध्यक्षीयभाषणं अतीव रुचिरप्रदं, अविस्मरणीयं आसीत्। सर्वाः समस्याः देशस्य वर्णिताः तासां समाधानमपि उद्घाटितम्। सर्वत्र प्रशंसा जाता वस्तुतः पण्डित दीनदयालमहोदयस्य अन्तिमं वक्तव्यमासीत् अन्तिमं दर्शनं जनता कृतवती।

१९६८तमे वर्षे फरवरी मासस्य ११ तारिकायां रात्रिवेलायां महोदयः लखनऊतः पटनानगरं रेलयानेन गच्छति स्म। परं गन्तव्यस्थले न प्राप्तवान् अपितु मध्ये एव मुगलसरायरेलवेस्थले तेषां मृतशरीरं सम्प्राप्तः। सम्पूर्ण देशे हाहाकारः अभवत्। राजनैतिक क्षेत्रस्य महान तपस्वी अस्तं गतः।

संन्दर्भ-

१. महेश भार्गवः, पं०दीनदयालय उपाध्याय-राष्ट्रीय एकता के महान विचारक विभोर ज्ञानमाला, आगरा

२. डॉ. कौशिक कमलः, पं० दीनदयाल उपाध्याय के दार्शनिक एवं शैक्षिक विचार एवं वर्तमान परिप्रेक्ष्य में उनकी प्रांसगिकता लक्ष्मीप्रकाशन, मथुरा ।

३. डॉ. शर्मा जगदीश, एकात्ममानववाद के प्रणेता पं० दीनदयाल उपाध्याय, मयूर इण्टरप्राजेज, दिल्ली।



दामिन्या

-प्रो० ओम प्रकाश पाण्डेयः

पित्रोर्विहाय मधुरा± मथापि सर्वान्
भ्रातॄँस्तथैव भगिनीश्च सखीश्च सर्वाः।
यातास्म्यहं सुविवशाद्य कमप्यचिन्त्यं
लोकान्तरं सुभयदं तमसाऽभिच्छन्नम्॥१॥

शक्नोमि नात्र पलमप्यधुना विधर्तुं
प्राणान् प्रियान् स्ववपुष-क्षत-विक्षता३ौ:।
जीवामि तात! बहुभिर्विविधैश्च यन्त्रैः
सर्वा३ौः श्वसिमि कृत्रिमरीतिभिर्हि॥२॥



शल्यक्रियाभिरथ मन्त्र-महौषधैश्च
मज्जीवनस्य परिरक्षणकल्पयोगे।
शक्तो बभूव निपुणोऽपि न वैद्यवर्गः
प्राणान् निरोद्धुमिह किञ्चिदपि स्वयत्नैः॥३॥

सौभाग्यमेव तदिदं भवतां गृहेऽहं
जाता तथैव विधिवत् परिपालितास्मि।
काश्र्येऽपि वित्तविभवस्य सुशिक्षयाऽह-
माभूषिता परिजनैश्च भवादृशैर्नु॥४॥

आदाय जन्म धनहीनकुलेऽपि पित्रो-
र्वात्सल्यमाप्य तनया नितराम्बभूव।
धन्या, किशोरवयसि श्रमिणो गृहेऽपि
सर्वानुरागमधिगम्य च पुत्रिकेयम्॥५॥



विद्यार्जनाय मम तीव्रतरं तयो यत्
सोढ़ं भवद्भिरिति तात! विमृश्य मन्ये।
शक्यस्तदस्य बहुजन्मसु नास्ति कश्चिन्।
निस्तार एव सुतया च मया कथञ्चित्॥६॥

आजन्मनः परिजनैश्च रसाप्लुताऽहं
शक्नोमि नैव गृहिणः प्रतिकर्तुमेव।
भूयस्तथापि परिचिन्त्य कुटुम्बसौख्यं
किञ्चिन्मयापि करणीयमितिस्वसंवित्॥७॥

विद्यामुपार्ज्य तनया विनयान्विता ये
संरक्षितुं परिजनानपि चेष्टमानाः।
धन्याः, परं तदितरे स्वकुटुम्बमत्र
येऽपि त्यजन्ति विभवे हि वराधमास्ते॥८॥

आसीन्ममापि हृदये सुविचार एषः
पित्रोर्भवानि सपदीह सहायिकाऽहम्।
विद्यामवाप्य विभजामि गृहस्य किञ्चिद्
भारं तथैव जनकस्य दुरन्त्यचिन्ताम्॥९॥



दुःखं तदत्र हृदये, नियतिर्विचित्रा
साध्यं न दृश्यत इहापि मनोगतम्मे।
यच्चिन्तितं भवति तात! नरस्य लोके,
भाग्यं ततश्च विपरीतमभिव्यनक्ति॥१०॥

दुर्दैवतः प्रियतरा दुहिता त्वदीया
कार्यालयान्निजगृहं हि निवर्तमाना।
रात्रौ बलात् कतिपयैर्बसयानमेत्य
दुष्टैः प्रसह्य प्रसभं सहसा गृहीता॥११॥

एका यथा हि हरिणी विपिने ह्यकस्मात्
संपीडिता भवति वागुरिकैरनेकैः।
आसीन्ममापि सदृशी स्थितिरेव तत्र
मध्ये नृशंसतमधूर्तनराधमानाम्॥१२॥

नासीद् भयं किमपि तेषु हि शासनस्य
नासीद् विभीतिरपि भागवती कथञ्चित्।
दुर्वृत्तिभिर्जनितदुर्जयवासनाभिः
स्वाच्छन्द्यमेव निहितं हृदयेषु तेषाम् ॥१३॥

शीतार्तदुर्लभजनप्रसरे च मार्गे
गाढान्धकार भरिते बसयानकेऽपि।
त्रस्तां कथञ्चिदबलां युवतीं निगृह्य
भोक्तुं बलादभिरतान् न रुरोध कश्चित्॥१४॥

पाञ्चालराजतनयामवमन्तुमेको
दुःशासनः समभवद्धि बलात् प्रवृत्तः।
उत्पीडनाय तनयां तव तात! रात्रा-
वासन् परं षडधिकाः परितो भुज[३]ाः॥१५॥

अत्युन्मदा हि युवतीं प्रमदान्निरीक्ष्य
कामातुराः सपदि निर्दलने प्रवृत्ताः।
आत्मानुशासनमदर्शि न मद्यपेषु,
सद्भावना भवति नापि नराधमेषु ॥१६॥

किं वर्णयामि भवतां पुरतश्च तेषां
तत्तत् प्रसह्यगमनं मम घर्षणञ्च।
हिंसा-निपातनमथापि नृशंसघाताः-
किं किं कृतं न पशुभिर्मयिदुर्बलायाम्॥१७॥

वाच्या न सन्ति युवकाः 'पशु' -नामभिस्ते
दृष्टा पशुष्वपि वनेषु सुनीति-रीतिः।
कुर्वन्ति नैव पशवश्च कदाचिदित्थं
भोगः प्रसह्यगमनं निजयौवतस्य ॥१८॥



वासो विदार्य निखिलञ्च वपुर्मदीयं
नग्नं विधाय सततं क्षत-विक्षतञ्च।
यानाद् बहिर्विवसनं मरणाय भूमौ
क्षिप्तं गतासुमिव तन् निघृणैश्च तैर्हि॥१९॥

ज्ञेयं स्वतश्च भवता स्व मनीषयैव
कृत्यं तुतुत्सतितराञ्च सुतां त्वदीयाम्।
वक्तुं पितस्तदधिकां निजयातनां तां
शक्नोमि नैव, विवशा त्रपया, निगूढाम्॥२०॥

शीतः प्रवाति पवनो, हिमशीतला भूः
रात्रौ निशीथसमयो, न सहायकश्च।
कश्चित् समीपमपि नैति भयान्मनुष्यः
सैषा स्थितिः सुविषमापि विभावनीया॥२१॥

सौभाग्यतस्तदनु रक्षिजनेषु कोऽपि
दृष्ट्वा निपीडिततमाञ्च तनुं मदीयाम्।
आनीतवान् निकटवर्तिनि वैद्यधाम्नि
संरक्षणाय, भिषजाप्युपचारहेतोः॥२२॥


पश्चादियं मम कथा विदिता भवद्भिः,
संघर्ष एव नियतो मम भाग्यचक्रे।
लब्धुं चिकित्सकवरं कुशलं भ्रमन्ती
देशान्तरं गतवती तनया त्वदीया॥२३॥

जानामि नैव दिवसान् मम जीवनस्य,
अद्यैव मृत्युरथवा भविता परश्वः।
संप्रेषयामि तदिदं मम मृत्युपत्रं
स्वेच्छां निरूप्य लिखितं रुधिराक्षरेषु॥२४॥

शोकं निगृह्य हृदये मम मृत्युजन्यं
हे तातवर्य! भवतादयमेव यत्नः।
एकाकिनी न युवतीह बलात्कृता स्यात्
सा मादृशी युवजनैर्न निपीडितैव॥२५॥

भोग्या हठादपि भवेन्न कदापि कापि,
नारी क्वचिद्धि विचरेच्च भयाद् विमुक्ता।
कारागृहेषु निवसन्तु भुज[3] मास्ते
येषां न हृत्सु वनितां प्रति मानराशिः॥२६॥

आलिख्य तातः! तदिदन्तु मनोगतम्मे
तूष्णीं भवामि, Ãणु किञ्चनिवदेनम्मे।
अद्यप्रभृत्यवनिमध्यगताश्च सर्वा
नार्यः सदैव तनयेव सुरक्षणीयाः॥२७॥



- बी-१/४ , विक्रान्त खण्डम्,
गोमतीनगरम्, लखनऊ-२२६०१०
उत्तर प्रदेशः

दर्पणः

-डॉ. निरंजना सी जोशी

दर्पणः, मुकुरः, आदर्शः आदि त्रिविधैः नामभिः प्रचलिताः। प्रत्येकं शब्दः अर्थयुक्तः अस्ति। तदर्थम् कविभिः, तत्त्वदर्शिभिः च मनस्विभिः च मानवीमनः दर्पणसमानं मन्यते।

दर्पणः तटस्थः अस्ति। यद् बिम्बः तस्य समक्षः आगतः, तस्य केवलं प्रतिबिम्बं दर्शयति। तस्य प्रभावः स्वतोपरि न दर्शयति। अत एव मनुष्येन यदि दर्पण समं मनः निर्मितः, तत् कदापि नैराश्यं न स्पृशत्।

मुकुरः भाले तिलकं कर्तुम्, सौन्दर्यपिपासुम् मुखं द्रष्टुम् , केशकलापं व्यवस्थितं कर्तुं, मुखे विकृतिं द्रष्टुम् सर्वान् तुष्यति।

कविकुलगुरु कालिदासेन रचिते "रघुवंशे" लिखितम् -

प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम्।
कौस्तुभाख्यमपां सारं बिभ्राणं बृहतोरसा॥ (१०/१०)

विष्णोः विशालवक्षस्थले कौस्तुभमणिं दृष्ट्वा तं दर्पणं मत्वा लक्ष्मी Ãृंगारसमये स्वमुखं अपश्यत्। मुकुरेण कित्येकं नियमनं पालयितुं आवश्यकः। तेन सर्वदा निर्मलं दर्शितव्यम्। दर्पणः कदापि सुमुखं व्यक्तिं प्रति उद्विग्नः नास्ति। न सः उद्विग्नः व्यक्तिः कदापि दर्पणं प्रति आपद्गतः चिन्तयति। अत एव श्रीमद्भगवद्गीतायाः वचनं स्मर्तव्यः -

"यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैः मुक्तो यः सः च मे प्रियः॥

प्रसन्न प्रतिबिम्बं दर्शयित्वा आदर्शः सदा अमर्षेण, भयेन च मुक्तः अस्ति। दर्पणे मालिन्यं वास्तवदर्शनेन अपक्रमति। आदर्शः नामधारकः सार्थकम् करोति। सः षड्विकाराणि न दर्शयति।

आदर्शः अप्रभावितः स्थितः अथ केवलं तं प्रबलः वायुः न कम्पयति। न तु अनलेन सः दग्धः, वृष्टिनाऽपि सः न सीक्यते। इत्थम् दर्पणं अनुसारकः सदा सुखास्पदः भवेत्।

'अस्तु'

** ए/३७, ब्रोदर्स सी.एच.एस दिलीप गुप्ते मार्गः, महीम मुम्बई- ४०००१६*

ईश्वरः सर्वव्यापकः

-डॉ. रामकिशोरमिश्रः

ईश्वरः सर्वजीवेषु तदात्मरूपेण स्थितः।
यो जीवं तिरस्करोति तस्मिन्नीशः प्रसीदति ।।१।।
यः परात्पृथक्स्वं वेत्ति स जानातीश्वरं कथम् ?
यः पश्यति स्वं सर्वेषु स ईश्वरं हि पश्यति ।।२।।
यो न करोत्यह±ारं प्रसन्नस्तस्मिनीश्वरः ।
ईश्वरः स सर्वव्यापी सर्वसंसारं रक्षति ।।३।।
यः करोति परे द्वेषं द्वेष्टि स ईश्वरं प्रति ।
सेवते यो महारुग्णं स सदेश्वरं सेवते ।।४।।
या कुष्ठरोगिणः सेवा सा सेवा परमात्मनः ।
यः कुष्ठिघृणां कुरुते स ईशघृणा मन्यते ।।५।।
त्वमेवाऽऽशा विश्वासो मे, त्वमाकाशो वसुन्धरा ।
त्वं प्रकृतिर्मे प्राणास्त्वं त्वं सर्वमीश! रक्ष माम् ।।६।।
स जनको जननी च सोऽध्यापकः स च गुरुः ।
सोऽस्ति मित्रं स च भार्या स च पुत्रोऽस्ति तारकः ।।७।।
परमात्मन्! नमस्तुभ्यं सर्वजीवसुरक्षक!
त्वमीश! सर्वजीवेषु पश्यामि सर्वव्यापकम् ।।८।।



-द्वारा श्रीसौरभमिश्रः, २९५/१४ पौरामपुरम्, खेकड़ा, (बागपत) उत्तरप्रदेशः

क्षणिकाः - ५

-प्रो. शुकदेवः शर्मा*

१. अक्षौहिणी (-फौज)
सेना वाहिनी राष्ट्ररक्षित्री वा
अक्षौहिणी
या-
अक्षति व्याप्नोति धारयति धरते वा
अक्षान् रथादिचतुर[3] नि।
(√अक्ष्.भ्वा.+ ऊह्+ णिनि+ ङीप्
= रथः -अश्वः- हस्तिन्-
पदातिÁ ऐतषां ऊहिनी-सञ्चितिः)

२. अखिलम् (वि.)
निखिलं समस्तं सम्पूर्णं समग्रं वा
अखिलं
यस्य यस्मिन् वा-
नास्ति न विद्यते न भवति वा
किञ्चिदपि खिलं अवशिष्टम्।
(नञ्+ खिलः)

३. अगः (वि.)
स्थिरो निश्चेष्टः स्थाणुः गतिहीनो वा
अगः
यः-
न गच्छति न चलति न क्रमते न स्पन्दते वा
पर्वतादिवत्।
(नञ्+√गम्+भ्वा. + ड; न.त.)

४. अगतिकः (वि.)
निराश्रयो निस्सहायो निरुपायः एकाकिन् वा
अगतिकः
यस्य-
नास्ति न भवति न विद्यते
कोऽप्याश्रयः उपायो वा।
(नञ्+√गम. भ्वा+ क्तिन्+कन्.)

५.-१ अगदङ्कारः (-हकीमः)
वैद्यो भिषग् व्याधिहरो वा
अगदङ्कारः
यः-
दापति दाम्पति शोधयति शमयति दूरीकरोति वा
गदं रोगम्।
(अ[3]+ √दै.भ्वा+ अच्+√ कृ.तना+ अण्+ मलोपश्च.)

५.-२. अगदङ्कारः (-हकीमः वैद्यः)
वैद्यकः चिकित्सको रुजापहर्त्ता वा
अगदङ्कारः
यः-
करोति विदधाति कुरुते
अगदं रोगरहितम्।
(नञ्+ गदं+ √कृ.तना+अण्.)

६. १- अगस्त्यः (-महर्षि.)
अगस्तिः कुम्भजो घटयोनिर्वा
अगस्त्यः
यः-
स्त्यानो मुखरः शब्दायमानः
आसीत् अगे कुम्भे।
(अग+√स्त्यै.भ्वा.+क.)

६.२ अगस्त्यः
घटजः कलशोद्भवः तन्नामा ऋषिर्वा
अगस्त्यः
यः-
स्तायति अलङ्करोति विभूषयति
अगं विन्ध्याचलं स्वस्थित्या।
(अग √स्त्यै.भ्वा.+क.)

* *अतिथि आचार्यः,विÂवैÂरानन्द वैदिक-शोध-संस्थानम्, साधु-आश्रमः, होशियारपुर- १४६०२१, पञ्जाबप्रदेशः*

७.- अगारम् (-घर.)



क्षयो वेशो गृहं भवनं वा
अगारं
यत्र-
ऋच्छति प्राप्नोति लभते
अगं स्थैर्यं जीवः।

८. अगोचरम् (वि.-परमात्मन्)

अदृश्यं अव्यक्तं इन्द्रियातीतं अज्ञेयं वा
अगोचरं
यत्-
नाधिः गच्छन्ति न पश्यन्ति नावलोकयन्ति न गृह्णन्ति वा
गावः इन्द्रियाणि।
(नञ्+ √गम्+भ्वा. + डो; √चर्. भ्वा.+ अच्.)

.



क्षणिकाः - ६

१. अग्निः (-आग.)

अनलो ज्वलनो दहनो वह्निः ऊर्ध्वजिह्वो वा
अग्निः
यः-
अ३ति गच्छति पेलति प्रवर्त्तते वा
ऊर्ध्वं सदा।
(√अ३.भ्वा+नि+धातोः ङलोपश्च.)

२. अग्रनीः (णीः)

नेतृ नायकः पथप्रदर्शकः अग्रगण्यो वा
अग्रनीः (-णीः)
यः-
अ३ति गच्छति चलति
प्रतिष्ठति वा अग्रे सर्वेषाम्।
(√अ३.भ्वा+रन्+धातोः न लोपः ; नी+क्विप्+ णत्वञ्च)

३. अघम् (-पाप.)

पापं पातकं किल्विषं कुकृत्यं वा
अघं
यस्मिन्-
अघयति दुष्करोति अपकरोति
परेषां पापात्मन्।
(√अघ्. चुरा.+ अच्.)

४.१ अघोषः (वि.-आवाज.)

न्युनस्वरो अल्पः ध्वनिः अस्वरो वा
अघोषः
यः -
घोष्यते उच्चार्यते निगद्यते
लघुस्वरेण प्राणिभिः।
(नञ्+√घुष्.भ्वा+घञ्)



४.२ - अघोषः (वि.-अक्षर.)

अनुदात्तः स्वरहीनो वा
अघोषः
यस्मिन्-
नास्ति न विद्यते न भवति वा
घोषः स्वरः।
(नञ्√घुष्. भ्वा.+ घञ्. प्रत्येकवर्गस्य
द्वाद्यौ क-खौ-आदयः शः षः सश्च-अघोषाः)

५. अ॒शः (-चाबुक)

कशा नियन्त्रकः प्रशासकः अ॒शिन् वा
अ॒शः
येन-
अ॒यति चालयति प्रेरयति नियन्त्रयति वा
हयान् रथिकः।
(√अ॒. चुरा.+ अच्+ उशस्.)

.



७. अ³ म् (-शरीर का अ³)
अवयवो गात्रं शरीरांशो वा
अ³ं
येन यैर्वा-
अ³न्ति विचरन्ति भ्रमन्ति कुर्वन्ति वा
प्राणिनो लोके।
(√ अ³ . भ्वा.+ अच्)



७.१ अ³ जा (-बेटी)
आत्मजा सुता वत्सा पुत्री वा
अ³जा
या-
जायते उत्पद्यते उद्भवति वा
अ³भ्यः पित्रोः।
(अ³ + √जन्.दिवा.+ ङ)



७.२ अ³ जाः (-बाल. ब. व.)
मूर्धजाः तनुरुहाः शिरसिजाः केशाः वा
अ³जाः
ये-
जायन्ते समुद्भवन्ति विकसन्ति
अ³षु जीवानाम्।
(अ³ + √जन्.दिवा.+ ङ ब.व.)

८. अ³ दम्. (-कङ्गण)
क±णं हस्तवलयं कटको हस्ताभरणं वा
अ³दं
यत्-
दायति अभिरक्षति त्रायते विभूषयति वा
अ³ं भुजम्।
(अ³ + √ दै. भ्वा.+ क.)



उद्याने

-डॉ. हर्षदेवमाधवः

पुष्पात् पुष्पं गच्छति भृङ्गः ।
भृङ्गं दृष्ट्वा हृष्यति पुष्पम् ।
पुष्पे पुष्पे नृत्यति वायुः ।
वायुः वहति च मधुरसुगन्धम् ।
सुगन्धेन नृत्यन्ति वृक्षाः ।
वृक्षे वृक्षे सूर्यप्रकाशः ।
सूर्यप्रकाशः नभसि खगेषु ।
खगाः प्रविष्टा श्वेतघनेषु ।
श्वेतघनाः इव बकाः तडागे ।
इदं तडागं खलु उद्याने ।
उद्याने सन्ति पुष्पाणि ।
पुष्पात् पुष्पं गच्छति भृङ्गः ॥



* ८, राजतिलक बंगलो, आबादनगरम्, बस स्थानकस्य समीपे, अहमदाबादः-३८००५८

चन्द्रयानम्

गच्छति शीघ्रं चन्द्रं यानम्।
मातः! गन्तुं तेन मनः मे।
अन्तरिक्षयानं नः डयते।
चन्द्रमसं प्राप्तुं ननु यतते।
चन्द्रमसं मातुलं मिलितम्।
तत्र गतं नः यानं वस्तुम्।
चन्द्रभूमिः हिमसदृशी धवला।
मातुलानी मे तत्र चन्द्रिका।
तत्र भवेयुः तूलपर्वताः।
पयोहिमेन किं नु निर्मिताः।
रौप्यकशैलान् आनेष्यामि
तत्र गृहं मे रचयिष्यामि।
गृहे भविष्यति ध्वजः त्रिरङ्गः।
नेष्यामि त्वां चन्द्र मातः।





संस्कृतेर्नवोऽध्यायः

-डॉ. हर्षदेवमाधवः

नवत्यधिकद्विसहस्रतमस्य संवत्सरस्य कश्चित् कालः प्रचलति। घटिकायन्त्राणि सन्ति, द्रष्टुं मानवा न सन्ति। नगराणि सन्ति, नागरा न सन्ति। वाहनानि सन्ति, वाहकाः, यात्रिका न सन्ति। धूमाच्छादितायां भुवि अद्यापि सूर्यप्रकाशः स्पष्टतया न प्रसरति। रासायनिक-शस्त्रप्रयोगेषु मनुष्यजातिस्स्वयमेव परस्परवैराग्निदग्धा विनष्टाऽस्ति। प्राणिसृष्टिरपि पञ्चत्वं गताऽस्ति। कृत्रिमबुद्धिप्रयोग-बाहुल्यात् (Artificial Intelligence) मनुष्याः नैराश्यमनुभूय स्वात्मघातं कृतवन्तः। यन्त्रैर्मनुष्या हताः, मनुष्यैर्यन्त्राणि नाशितानि। यन्त्रमनुष्य-मानवानां सङ्घर्षेण मनुष्याणां क्रौर्यं यन्त्रेषु प्रविष्टम्। यन्त्रैः यन्त्रान्तरैः सार्धं मनुष्यान् हन्तुं विषाणव उत्पादिताः। मनुष्याणां विषाणुभिः यन्त्राणां कार्यप्रणाली नष्टा। वृक्षेषु फलानां स्थानेषु विषाक्ताः कण्टकाः जाताः। वर्षासु विषमिश्रितानि रसायनानि प्रावर्षन्। यन्त्रमानवैस्सृष्टा विचित्रकिरणा दुर्भेद्या भित्तीरपि विगणय्य मनुष्याणां घातं कृतवन्तः। प्राणिनोऽपि स्वभावं विस्मृत्य परस्परं हन्तुकामा अभवन्। यन्त्रमानवा मूषकवत् निगूढान् मानवान् व्यापादयन्ति स्म। नभसि दिवसोऽस्ति वा रात्रिरस्ति इति ज्ञानं नष्टम्, यतो हि सर्वत्र मनुष्यविकृतिप्रभावः प्रासरत्। यन्त्रसृष्टौ कलनादा अपि न अश्रूयन्त।

यन्त्राणां विद्युत्सञ्चयो नष्टः। यन्त्राणां कार्यशक्तिरपि समाप्ता। मनुष्याणामभावाद् यन्त्राणि श्रान्तानि, तानि विचारशक्तिशून्यतावशात् मरणान्तरावस्थां गतानि। इदानीं सर्वत्र शान्तिः प्रसरति। शनैः शनैः सूर्यप्रकाशः पापनाशं करोति पृथिव्याम्। पृथव्याः मूर्च्छितावस्थायां षण्मासा व्यतीताः सन्ति। भूवि सर्वत्र निस्तब्धता वर्तते।

सहसा व्योम्नो विद्युत्तेजो विकीरद् एकम् अन्तरिक्षयानं प्रविशति। तद् यानं गर्गभट्टाचार्यस्य विशालगृहस्य प्राङ्गणे अवतरति। डॉ. गर्गः 'इसरो' इति ख्यातान्तरिक्षानुसन्धानसंस्थायाः वरिष्ठो वैज्ञानिकोऽस्ति। तेन स्वयमेव लघुकमन्तरिक्षयानं निर्मितं वर्तते। अन्तरिक्षे कस्यापि ग्रहस्य समीपे भारतेन एका प्रयोगशाला स्थापिताऽस्ति। तत्र तस्य पुत्री लोपा प्रयोगशालाया अध्यक्षाऽस्ति। सा लघुकाद् यानाद् अवतरति मुखपट्टं धृत्वा। अन्तरिक्षयानाद् वायुशुद्धीकरणरसायनेन सा वायुशुद्धिं करोति।

षण्मासेभ्यः पूर्वं डॉ. गर्गमहाशयस्य एकः सन्देशः आगत आसीत्। तेन प्रेषितः सन्देशः सा±तिक-भाषायाम्, किन्तु लोपा तात्पर्यम् अवागच्छत्।

'अयं मे अन्तिमः सन्देशोऽस्ति। त्वं जानास्येव समग्रं विश्वं महाविनाशं गन्तुकाममस्ति। मानवैर्यन्त्रेभ्यः सर्वविधं प्रभुत्वं दत्त्वा मानवजातेर्महाविनाशो निश्चितोऽस्ति। विश्वस्य सर्वे वैज्ञानिका विनाशं निवारयितुं प्रयत्नान् कृतवन्तः, किन्तु बालिशा राजनीतिज्ञाः स्वेषां देशानां समग्रे ब्रह्माण्डे प्रभुत्वं स्थापयितुं यतन्ते। अहं तु प्रधानमन्त्रिणा आहूतः गमिष्यामि, किन्तु मम जीवनस्य सम्भावना नास्ति। शीघ्रमेव विश्वस्य सर्वेषां देशानां वैरेण नंक्ष्यन्ति सर्वान्तरिक्षानुसन्धानकेन्द्राणि वैज्ञानिकाÁ। धर्मं विहाय प्रजाः पशुत्वं गताः सन्ति। अतः मानवान् त्रातुं न काऽपि संस्था वर्तते। शुष्कतृणैर्हरिततृणान्यपि ज्वलन्त्येव। अतः पशु-पक्षि-वनस्पति-जन्तुसृष्टिरपि विनाशाग्नौ नंक्ष्यति। त्वं जानास्येव यद् 'विवेक भ्रष्टानां भवति विनिपातः शतमुख' इति। त्वया यथा कर्तव्यं तथा मया पूर्वं सूचितम्।' इति।

* ८, राजतिलक बंगलो, आबादनगरम्, बस स्थानकस्य समीपे, अहमदाबादः-३८००५८

लोपा गृहे प्रवेशात् पूर्वं कतिपयक्षणान् यावत् स्थित्वा स्वस्य यन्त्रेण वायुशुद्धिं करोति। सा प्रयोगशालां गत्वा गुप्तद्वारम् अङ्गुष्ठस्पर्शेण उद्घाटयति। भूमिगर्भे सोपानपङ्क्तिरस्ति। सा नवति-फूटमितं नीचैरवतीर्य पश्यति अपरामेकां प्रयोगशालाम्। सा एकस्मिन् कक्षे स्थितं यन्त्रमानवमाह्वयति, 'वेद! भ्रातः! आगच्छ मया सह। वेदो ब्रवीति,' सुभगे! त्वं कदा आगता? अहं तव प्रतीक्षां करोमि। भट्टाचार्यगुरुणा आदिष्टोऽहं ते साहाय्यं कर्तुम्। भवत्याः कृते भोजनं सिद्धं करोमि शीघ्रमेव।'

लोपा वदति, भ्रातः! मया आनीतानि अन्तरिक्षप्रयोगशालाया लघुकाद् उद्यानात् कानिचिद् फलानि। अतः अन्यभोजनस्य आवश्यकता नास्ति। आगच्छ, भ्रातः! पितृपादस्य आदेशानुसारं गच्छाव।' इति गृहस्य प्रा^{3}णे एकं लघुकं व्योमयानमस्ति। उभावुपविशतः। रिमोट-सञ्चालितं यानं जलदान् भित्त्वा सत्वरं डयते जलदैस्सह संलपद् इव। इदं व्योमयानं यत्र कुत्रापि अवतरणं कर्तुं क्षममस्ति। लोपा स्वयन्त्रप्रणाल्या मार्गावलोकनं करोति। नीचैः हिमालयस्य शृङ्गाणि दृश्यन्ते। यानं पञ्चसहस्रं फूटमितम् ऊर्ध्वं डयते। सहसा लोपा गुहायाः बहिः एकं मृगचर्मं पश्यति। सा शनैः शनैः किञ्चिद् दूरं व्योमयानम् अवतारयति, यतः कस्यापि तपस्विनः तपसि विघ्नं न भवेत्।

लोपा एककिलोमिटरं यावत् मार्गं समाप्य गुहायाः समीपम् आगच्छति। सा शिलापीठे तुष्णीं स्थित्वा प्रतीक्षते। एकमुहूर्तस्य कालः समाप्तिं गच्छति। कोऽपि युवा मृगचर्मवेष्टितः, भस्मत्रिपुण्डभूषितः, तेजस्वी तपस्वी बहिरायाति।

लोपा उत्थाय प्रणमति।

'स्वागतम् अतिथये! कथं विदुषः वैज्ञानिकस्य प्रखरवैज्ञानिकी पुत्री मम अकिञ्चनस्य समीपे आगताऽस्ति? विज्ञानेन सर्वमपि दत्तं विश्वस्मै, अथ च सर्वमपि अपहृतम्, अधुना विश्वस्य समीपे न किञ्चिदवशिष्टम्! लोपा प्रत्युत्तरति 'भगवन्! भवान् सर्वमपि जानाति। किन्तु विज्ञानेन ज्ञानस्य नाशो न भवेदिति मे पितृपादस्य आज्ञा आसीत्। अतः अहं भगवत्कार्यं साधयितुं प्रेषिताऽस्मि।'

तपस्वी मन्दं मन्दं हसति, 'सर्वमपि महाकालस्य लीला वर्तते। मनुष्यैः निर्मिता यन्त्रमानवा एव मनुष्याणां शत्रवो जाताः। मनुष्यैस्स्वेषां सर्वदुर्गुणानां बीजानि यन्त्रमानवेषु उप्तानि। अतो विनाशः अनिवार्यः। मनुष्याः स्वात्मनः ईश्वरसदृशाः ईश्वरादधिका अमन्यन्त। अतः एतत् सर्वम् अवश्यं भावि आसीत्।'

लोपा शनैः शनैः ब्रवीति, 'भगवन्! भवान् ऋतं वदति। मम पित्रा विनाशं निवारयितुं सर्वे प्रयत्नाः कृताः आसन्।'

देवि! अहं जानामि।' तपस्वी वदति, 'अहं भार्गवः! अहं नैकेभ्यः वर्षेभ्यः तपस्यामि। मया त्रिषु लोकेषु न किञ्चिदपि प्राप्तव्यमस्ति। मम गुरुः कैलासे दिव्याश्रमे वसति। दिव्याश्रमोऽयं मनुष्यैः सर्वथा अस्पृष्टः, अदृश्यः, अकल्पनीयः। मम गुरुभट्टारकेण भवदागमनं सूचितमेव। भवती जानाति यद् विश्वस्य नाशाद् ऋषीणां सञ्चितं ज्ञानं रक्षणीयमस्ति।'

लोपा सोत्साहं वदति, भगवन्! मम पितृपादः चतुरान् यन्त्रमानवान् निर्मितवान्, ये समग्रं संस्कृतवाङ्मयं जानन्ति।

'सुभगे ! मम समीपे किञ्चिदपि नास्ति । अहं निरीहः अनिकेतः सुखदुःखनिरपेक्षः वर्ते।'

लोपा वदति, 'अतएव मया भवान् वृतोऽस्ति।'

भार्गवः कथयति, 'अहं भवत्याः अभिप्रायं नावगच्छामि।'

लोपा सस्मितं वदति, 'भगवन्! सृष्टेः सर्वनाशो जातोऽस्ति। इदानीं पुनरपि ऋषिवंशं पृथ्व्यां प्रवर्तयितुम् आवाम् अवशिष्टौ दैवेन।'

भार्गवः अवदत् 'अहं भवत्या भावार्थं नावगच्छामि। अहं आजन्मनः ब्रह्मचारी। अहं स्वप्नेऽपि कामसुखं नेच्छामि।'

लोपा 'तर्हि सृष्टौ ऋषिवंशस्य नाशस्य पापं भवतः शिरसि भविष्यति। प्रतियुगम् ऋषिधर्मा भिन्ना भवन्ति। यैः सृष्टौ ऋषिवंशाः प्रवर्तिताः ते कामुकाः नासन्। मानवजन्म एव सृष्टौ भुक्तिमुक्तिदायकमस्ति। स्मरतु भवान् भगवद्वाक्यम्-

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥

(गीता., १८-११)

धर्मसंस्थापनार्थं भगवान् स्वयं नैकान् अवतारान् स्वीकरोति। युगे युगे वेदसंरक्षणार्थं मत्स्यावतारो भवति। तत्र मनोरावश्यकता वर्तते वेदान् संरक्षितुम्। स्वकर्तव्यात् च्युतो भवान् पापमवाप्स्यति।'

भार्गवः अवदत् 'भद्रे! विषयविमुखोऽहं केवलं जीवामि। कामवासना-स्वरूपं कामस्य ज्ञानमपि नास्ति।' लोपा विहस्य वदति,' क्षणं तिष्ठतु।'

सा दूरसञ्चालन (Remote) यन्त्रेण यन्त्रमानवं वेदमाह्वयति।

वेद आगत्य प्रणम्य तिष्ठति।

लोपा सप्रश्रयं वदति, 'भ्रातः! एषः ऋषिवरः कामकलां न जानाति। भवान् उपदिशतु कामरहस्यम्।'

सा मुखं परिवर्त्य भार्गवं वदति, 'हे भगवन्! मम द्वौ पुत्रकृतकौ यन्त्रमानवौ स्तः। तौ नूतनयज्ञशालायाः निर्माणं करिष्यतः, कृषिञ्च करिष्यतः।'

भार्गवः हसति, 'स्वभावनिपुणा स्त्रीजातिः। अतः परिहर्तव्या योगिभिः। किन्तु पृथ्व्यां तु सर्वं विनष्टं तदा कृषिः कथं भविष्यति?'

लोपा सस्मितं प्रत्युत्तरति, 'मया अन्तरिक्षकेन्द्रे शस्यवनस्पति-जातस्य बीजानि संरक्षितानि सन्ति। मम पिता पूर्वमेव सृष्टेर्विनाशम् अजानात्। अतस्तेन सर्वाऽपि व्यवस्था कृताऽस्ति रक्षणार्थम्।'

भार्गवः वेदयन्त्रगुरोरधीते कामशास्त्रम् ।

ततः पश्चात् पुनरपि यज्ञशालायाम् अग्निः स्थापितो भवति। वृक्षेषु फलानां सौरभं प्रसरति। क्षेत्रं शस्य-कणिशैः रमणीयं भवति। कुटीरे शिशुरोदनं श्रूयते ।... पुनरपि संस्कृतेर्नवोऽध्यायः प्रारभ्यते ।

RNI No.
DELSAN/2002/8921

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी
के स्वामित्व में अकादमी के कार्यालय प्लाट सं.-५,
झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
से प्रकाशित